# Shri Maharajni Sahasranamastotram

# શ્રીમહારાજ્ઞીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shrImahArAjnIsahasranAmastotra

File name : mahArAjnIsahasranAmastotra.itx

Category : sahasranAma, devii, otherforms, stotra, devI

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD, PSA Easwaran

Description-comments : See corresponding nAmAvalI

Latest update : August 5, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીમહારાજ્ઞીસહસ્રનામસ્તોત્રમ્

અથવા શ્રીમહારાજ્ઞી રાજરાજેશ્વરીસહસ્રનામસ્તોત્રમ્

પાર્વત્યુવાચ -
ભગવન્ વેદતત્ત્વજ્ઞ મન્ત્રતન્ત્રવિચક્ષણ ।
શરણ્ય સર્વલોકેશ શરણાગતવત્સલ ॥ ૧॥

કથં શ્રિયમવાપ્નોતિ લોકે દારિદ્ર્યદુઃખભાક્ ।
માન્ત્રિકો ભૈરવેશાન તન્મે ગદિતુમર્હસિ ॥ ૨॥

શ્રીશિવ ઉવાચ -
યા દેવી નિષ્કલા રાજ્ઞી ભગવત્યમલેશ્વરી ।
સા સૃજત્યવતિ વ્યક્તં સંહરિષ્યતિ તામસી ॥ ૩॥

તસ્યા નામસહસ્રં તે વક્ષ્યે સ્નેહેન પાર્વતિ ।
અવાચ્યં દુર્લભં લોકે દુઃખદારિદ્ર્યનાશનમ્ ॥ ૪॥

પરમાર્થપ્રદં નિત્યં પરમૈશ્વર્યકારણમ્ ।
સર્વાગમરહસ્યાઢ્યં સકલાર્થપ્રદીપકમ્ ॥ ૫॥

સમસ્તશોકશમનં મહાપાતકનાશનમ્ ।
સર્વમન્ત્રમયં દિવ્યં રાજ્ઞીનામસહસ્રકમ્ ॥ ૬॥

ૐ અસ્ય શ્રીમહારાજ્ઞી રાજરાજેશ્વરી નામસહસ્રસ્ય બ્રહ્મા ઋષિઃ ।
ગાયત્રી છન્દઃ । સર્વભૂતેશ્વરી મહારાજ્ઞી દેવતા । હ્રીં બીજમ્ ।
સૌઃ શક્તિઃ । ક્લીં કીલકમ્ । શ્રીમહારાજ્ઞીસહસ્રનામજપે વિનિયોગઃ ।
ૐ હ્રાં હ્રીં ઇત્યાદિના કર-હૃદયાદિ ન્યાસઃ ।

NOTE: The follwing 5 lines (before "dhyAnaM" are not found in SVR's book

બ્રહ્મઋષયે નમઃ શિરસિ । ગાયત્રીચ્છન્દસે નમઃ મુખે ।
શ્રીભૂતેશ્વરીમહારાજ્ઞીદેવતાયૈ નમઃ હૃદિ ।

હ્રીંબીજાય નમઃ નાભૌ । સૌઃ શક્તયે નમઃ ગુહ્યે ।
ક્લીં કીલકાય નમઃ પાદયોઃ । વિનિયોગાય નમઃ સર્વાઙ્ગેષુ ।
ૐહ્રામિત્યાદિના કરષડઙ્ગન્યાસં વિધાય ધ્યાનં કુર્યાત્ ।

॥ ધ્યાનમ્ ॥

યા દ્વાદશાર્કપરિમણ્ડિતમૂર્તિરેકા
સિંહાસનસ્થિતિમતી હ્યુરગૈર્વૃતાં ચ ।
દેવીમનન્યગતિરીશ્વરતાં પ્રપન્નાં var દેવીમનક્ષગતિમીશ્વરતાં
તાં નૌમિ ભર્ગવપુષીં પરમાર્થરાજ્ઞીમ્ ॥ ૧॥

ચતુર્ભુજાં ચન્દ્રકલાર્ધશેખરાં સિંહાસનસ્થામુરગોપવીતિનીમ્ ।
var સિંહાસનસ્થાં ભુજગોપવીતિનીમ્ પાશાઙ્કુશામ્ભોરુહખડ્ગધારિણીં
રાજ્ઞીં ભજે ચેતસિ રાજ્યદાયિનીમ્ ॥ ૨॥

ૐ હ્રીં શ્રીં રાં મહારાજ્ઞી ક્લીં સૌઃ પઞ્ચદશાક્ષરી ।
હ્રીં સ્વાહા ત્ર્યક્ષરી વિદ્યા પરા ભગવતી વિભા ॥ ૧॥

ૐ ભાસ્વતી ભદ્રિકા ભીમા ભર્ગરૂપા મનસ્વિની ।
માનનીયા મનીષા ચ મનોજા ચ મનોજવા ॥ ૨॥

માનદા મન્ત્રવિદ્યા ચ મહાવિદ્યા ષડક્ષરી ।
ષટ્કૂટા ચ ત્રિકૂટા ચ ત્રયી વેદત્રયી શિવા ॥ ૩॥

શિવાકારા વિરૂપાક્ષી શશિખણ્ડાવતંસિની ।
મહાલક્ષ્મીર્મહોરસ્કા મહૌજસ્કા મહોદયા ॥ ૪॥

માતઙ્ગી મોદકાહારા મદિરારુણલોચના ।
સાધ્વી શીલવતી શાલા સુધાકલશધારિણી ॥ ૫॥

ખડ્ગિની પદ્મિની પદ્મા પદ્મકિઞ્જલ્કરઞ્જિતા ।
હૃત્પદ્મવાસિની હૃદ્યા પાનપાત્રધરા પરા ॥ ૬॥

ધરાધરેન્દ્રતનયા દક્ષિણા દક્ષજા દયા । var દશના દયા
દયાવતી મહામેધા મોદિની બોધિની સદા ॥ ૭॥

ગદાધરાર્ચિતા ગોધા ગઙ્ગા ગોદાવરી ગયા ।
મહાપ્રભાવસહિતા મહોરગવિભૂષણા ॥ ૮॥

મહામુનિકૃતાતિથ્યા માધ્વી માનવતી મઘા ।

બાલા સરસ્વતી લક્ષ્મીર્દુર્ગા દુર્ગતિનાશિની ॥ ૯॥

શારી શરીરમધ્યસ્થા વૈખરી ખેચરેશ્વરી ।
શિવદા શિવવક્ષઃસ્થા કાલિકા ત્રિપુરેશ્વરી ॥ ૧૦॥ var ત્રિપુરાપુરી

પુરારિકુક્ષિમધ્યસ્થા મુરારિહૃદયેશ્વરી ।
બલારિરાજ્યદા ચણ્ડી ચામુણ્ડા મુણ્ડધારિણી ॥ ૧૧॥

મુણ્ડમાલાઞ્ચિતા મુદ્રા ક્ષોભણાકર્ષણક્ષમા ।
બ્રાહ્મી નારાયણી દેવી કૌમારી ચાપરાજિતા ॥ ૧૨॥

રુદ્રાણી ચ શચીન્દ્રાણી વારાહી વીરસુન્દરી ।
નારસિંહી ભૈરવેશી ભૈરવાકારભીષણા ॥ ૧૩॥

નાગાલઙ્કારશોભાઢ્યા નાગયજ્ઞોપવીતિની ।
નાગકઙ્કણકેયૂરા (૧૦૦) નાગહારા સુરેશ્વરી ॥ ૧૪॥

સુરારિઘાતિની પૂતા પૂતના ડાકિની ક્રિયા ।
કૂર્મા ક્રિયાવતી કૃત્યા ડાકિની લાકિની લયા ॥૧૫॥

var ક્રિયાવતી કુરી કૃત્યા, શાકિની લયા
લીલાવતી રસાકીર્ણા નાગકન્યા મનોહરા ।
હારકઙ્કણશોભાઢ્યા સદાનન્દા શુભઙ્કરી ॥ ૧૬॥

મહાસિની મધુમતી સરસી સ્મરમોહિની । var પ્રહાસિની મધુમતી
મહોગ્રવપુષી વાર્તા વામાચારપ્રિયા સિરા ॥ ૧૭॥

સુધામયી વેણુકરા વૈરઘ્ની વીરસુન્દરી ।
વારિમધ્યસ્થિતા વામા વામનેત્રા શશિપ્રભા ॥ ૧૮॥

શઙ્કરી શર્મદા સીતા રવીન્દુશિખિલોચના ।
મદિરા વારુણી વીણાગીતિજ્ઞા મદિરાવતી ॥ ૧૯॥

વટસ્થા વારુણીશક્તિઃ વટજા વટવાસિની ।
વટુકી વીરસૂર્વન્દ્યા સ્તમ્ભિની મોહિની ચમૂઃ ॥ ૨૦॥

મુદ્રાઙ્કુશહસ્તા ચ વરાભયકરા કુટી ।
પાટીરદ્રુમવલ્લી ચ વટુકા વટુકેશ્વરી ॥ ૨૧॥

ઇષ્ટદા કૃષિભૂઃ કીરી રેવતી રમણપ્રિયા ।
રોહિણી રેવતી રમ્યા રમણા રોમહર્ષિણી ॥ ૨૨॥

રસોલ્લાસા રસાસારા સારિણી તારિણી તડિત્ ।
તરી તરિત્રહસ્તા ચ તોતુલા તરણિપ્રભા ॥ ૨૩॥

રત્નાકરપ્રિયા રમ્ભા રત્નાલઙ્કારશોભિતા ।
રુક્માઙ્ગદા ગદાહસ્તા ગદાધરવરપ્રદા ॥ ૨૪॥

ષડ્રસા દ્વિરસા માલા માલાભરણભૂષિતા ।
માલતી મલ્લિકામોદા મોદકાહારવલ્લભા ॥ ૨૫॥

વલ્લભી મધુરા માયા કાશી કાઞ્ચી લલન્તિકા ।
હસન્તિકા હસન્તી ચ ભ્રમન્તી ચ વસન્તિકા ॥ ૨૬॥

ક્ષેમા ક્ષેમઙ્કરી ક્ષામા ક્ષૌમવસ્ત્રા (૨૦૦) ક્ષણેશ્વરી ।
ક્ષણદા ક્ષેમદા સીરા સીરપાણિસમર્ચિતા ॥ ૨૭॥

ક્રીતા ક્રીતાતપા ક્રૂરા કમનીયા કુલેશ્વરી ।
કૂર્ચબીજા કુઠારાઢ્યા કૂર્મિણ્ઈ કૂર્મસુન્દરી ॥ ૨૮॥

કારુણ્યાર્દ્રા ચ કાશ્મીરી દૂતી દ્વારવતી ધ્રુવા । var કારુણ્યા ચૈવ
ધ્રુવસ્તુતા ધ્રુવગતિઃ પીઠેશી બગલામુખી ॥ ૨૯॥

સુમુખી શોભના નીતિઃ રત્નજ્વાલામુખી નતિઃ ।
અલકોજ્જયિની ભોગ્યા ભઙ્ગી ભોગાવતી બલા ॥ ૩૦॥

ધર્મરાજપુરી પૂતા પૂર્ણમાલાઽમરાવતી । var પૂર્ણસત્ત્વાઽમરાવતી
અયોધ્યા બોધનીયા ચ યુગમાતા ચ યક્ષિણી ॥ ૩૧॥ var યોધનીયા

યજ્ઞેશ્વરી યોગગમ્યા યોગિધ્યેયા યશસ્વિની ।
યશોવતી ચ ચાર્વઙ્ગી ચારુહાસા ચલાચલા ॥ ૩૨॥

હરીશ્વરી હરેર્માયા ભામિની વાયુવેગિની । var માયિની વાયુવેગિની
અમ્બાલિકાઽમ્બા ભર્ગેશી ભૃગુકૂટા મહામતિઃ ॥ ૩૩॥

કોશેશ્વરી ચ કમલા કીર્તિદા કીર્તિવર્ધિની ।
કઠોરવાક્કુહૂમૂર્તિઃ ચન્દ્રબિમ્બસમાનના ॥ ૩૪॥

ચન્દ્રકુઙ્કુમલિપ્તાઙ્ગી કનકાચલવાસિની ।
મલયાચલસાનુસ્થા હિમાદ્રિતનયાતનૂઃ ॥ ૩૫॥

હિમાદ્રિકુક્ષિદેશસ્થા કુબ્જિકા કોસલેશ્વરી ।

કારૈકનિગલા ગૂઢા ગૂઢગુલ્ફાઽતિવેગિની ॥ ૩૬॥   var  ગૂઢગુલ્ફાઽતિગોપિતા

તનુજા તનુરૂપા ચ બાણચાપધરા નુતિઃ ।
ધુરીણા ધૂમ્રવારાહી ધૂમ્રકેશાઽરુણાનના ॥ ૩૭॥

અરુણેશી દ્યુતિઃ ખ્યાતિઃ ગરિષ્ઠા ચ ગરિયસી ।
મહાનસી મહાકારા સુરાસુરભયઙ્કરી ॥ ૩૮॥

અણુરૂપા બૃહજ્જ્યોતિરનિરુદ્ધા સરસ્વતી ।
શ્યામા શ્યામમુખી શાન્તા શ્રાન્તસન્તાપહારિણી ॥ ૩૯॥

ગૌર્ગણ્યા ગોમયી ગુહ્યા ગોમતી ગરુવાગ્રસા ।
ગીતસન્તોષસંસક્તા (૩૦૦) ગૃહિણી ગ્રાહિણી ગુહા ॥ ૪૦॥

ગણપ્રિયા ગજગતિર્ગાન્ધારી ગન્ધમોદિની । ગન્ધમોહિની
ગન્ધમાદનસાનુસ્થા સહ્યાચલકૃતાલયા ॥ ૪૧॥

ગજાનનપ્રિયા ગમ્યા ગ્રાહિકા ગ્રાહવાહના ।
ગુહપ્રસૂર્ગુહાવાસા ગૃહમાલાવિભૂષણા ॥ ૪૨॥

કૌબેરી કુહકા ભ્રન્તિસ્તર્કવિદ્યાપ્રિયઙ્કરી ।
પીતામ્બરા પટાકારા પતાકા સૃષ્ટિજા સુધા ॥ ૪૩॥

દાક્ષાયણી દક્ષસુતા દક્ષયજ્ઞવિનાશિની ।
તારાચક્રસ્થિતા તારા તુરી તુર્યા ત્રુટિસ્તુલા ॥ ૪૪॥

સન્ધ્યાત્રયી સન્ધિજરા સન્ધ્યા તારુણ્યલાલિતા ।
લલિતા લોહિતા લભ્યા ચમ્પા કમ્પાકુલા સૃણિઃ ॥ ૪૫॥

સૃતિઃ સત્યવતી સ્વસ્થાઽસમાના માનવર્ધિની ।
મહોમયી મનસ્તુષ્ટિઃ કામધેનુઃ સનાતની ॥ ૪૬॥

સૂક્ષ્મરૂપા સૂક્ષ્મમુખી સ્થૂલરૂપા કલાવતી ।
તલાતલાશ્રયા સિન્ધુઃ ત્ર્યમ્બિકા લમ્પિકા જયા ॥ ૪૭॥

સૌદામિની સુધાદેવી સનકદિસમર્ચિતા ।
મન્દાકિની ચ યમુના વિપાશા નર્મદાનદી ॥ ૪૮॥

ગણ્ડક્યૈરાવતી સિપ્રા વિતસ્તા ચ સરસ્વતી ।
રેવા ચેક્ષુમતી વેગવતી સાગરવાસિની ॥ ૪૯॥

દેવકી દેવમાતા ચ દેવેશી દેવસુન્દરી ।
દૈત્યેશી દમની દાત્રી દિતિર્દિતિજસુન્દરી ॥ ૫૦॥  var  દૈત્યઘ્ની

વિદ્યાધરી ચ વિદ્યેશી વિદ્યાધરજસુન્દરી ।
મેનકા ચિત્રલેખા ચ ચિત્રિણી ચ તિલોત્તમા ॥ ૫૧॥

ઉર્વશી મોહિની રમ્ભા ચાપ્સરોગણસુન્દરી ।
યક્ષિણી યક્ષલોકેશી યક્ષનાયકસુન્દરી ॥ ૫૨॥  var  નરવાહનપૂજિતા

NOTE: The next line is not found in SVR’s book
યક્ષેન્દ્રતનયા યોગ્યા યક્ષનાયકસુન્દરી ।

ગન્ધવત્યર્ચિતા ગન્ધા સુગન્ધા ગીતતત્પરા ॥ ૫૩॥

ગન્ધર્વતનયા નમ્રા (૪૦૦) ગીતિર્ગન્ધર્વસુન્દરી ।
મન્દોદરી કરાલાક્ષી મેઘનાદવરપ્રદા ॥ ૫૪॥

મેઘવાહનસન્તુષ્ટા મેઘમૂર્તિશ્ચ રાક્ષસી ।
રક્ષોહર્ત્રી કેકસી ચ રક્ષોનાયકસુન્દરી ॥ ૫૫॥

કિન્નરી કમ્બુકણ્ઠી ચ કલકણ્ઠસ્વનાઽમૃતા var  કલકણ્ઠસ્વના સુધા
કિમ્મુખી હયવક્ત્રા ચ ખેલાકિન્નરસુન્દરી ॥ ૫૬॥

વિપાશી રાજમાતઙ્ગી ઉચ્છિષ્ટપદસંસ્થિતા ।
મહાપિશાચિની ચાન્દ્રી પિશાચકુલસુન્દરી ॥ ૫૭॥

ગુહ્યેશ્વરી ગુહ્યરૂપા ગુર્વી ગુહ્યકસુન્દરી ।
સિદ્ધિપ્રદા સિદ્ધવધૂઃ સિદ્ધેશી સિદ્ધસુન્દરી ॥ ૫૮॥

ભૂતેશ્વરી ભૂતલયા ભૂતધાત્રી ભયાપહા ।
ભૂતભીતિહરી ભવ્યા ભૂતજા ભૂતસુન્દરી ॥ ૫૯॥

પૃથ્વી પાર્થિવલોકેશી પ્રથા વિષ્ણુસમર્ચિતા ।
વસુન્ધરા વસુનતા પર્થિવી ભૂમિસુન્દરી ॥ ૬૦॥

અમ્ભોધિતનયાઽલુબ્ધા જલજાક્ષી જલેશ્વરી ।
અમૂર્તિરમ્મયી મારી જલસ્થા જલસુન્દરી ॥ ૬૧॥

તેજસ્વિની મહોધાત્રી તૈજસી સૂર્યબિમ્બગા ।
સૂર્યકાન્તિઃ સૂર્યતેજાઃ તેજોરૂપૈકસુન્દરી ॥ ૬૨॥

વાયુવાહા વાયુમુખી વાયુલોકૈકસુન્દરી ।
ગગનસ્થા ખેચરેશી શૂન્યરૂપા નિરાકૃતિઃ ॥ ૬૩॥ શૂરરૂપા

નિરાભાસા ભાસમાના ધૃતિરાકાશસુન્દરી ।
ક્ષિતિમૂર્તિધરાઽનન્તા ક્ષિતિભૃલ્લોકસુન્દરી ॥ ૬૪॥

અબ્ધિયાના રત્નશોભા વરુણેશી વરાયુધા ।
પાશહસ્તા પોષણા ચ વરુણેશ્વરસુન્દરી ॥ ૬૫॥

અનલૈકરુચિર્જ્યોતિઃ પઞ્ચાનિલમતિસ્થિતિઃ ।
પ્રાણાપાનસમાનેચ્છા ચોદાનવ્યાનરૂપિણી ॥ ૬૬॥

પઞ્ચવાતગતિર્નાડીરૂપિણી વાતસુન્દરી ।
અગ્નિરૂપા વહ્નિશિખા વડવાનલસન્નિભા ॥ ૬૭॥

હેતિર્હવિર્હુતજ્યોતિરગ્નિજા વહ્નિસુન્દરી ।
સોમેશ્વરી સોમકલા સોમપાનપરાયણા ॥ ૬૮॥

સૌમ્યાનના સૌમ્યરૂપા સોમસ્થા સોમસુન્દરી ।
સૂર્યપ્રભા સૂર્યમુખી સૂર્યજા સૂર્યસુન્દરી ॥ ૬૯॥

યાજ્ઞિકી યજ્ઞભાગેચ્છા યજમાનવરપ્રદા ।
યાજકી યજ્ઞવિદ્યા ચ યજમાનૈકસુન્દરી ॥ ૭૦॥

આકાશગામિની વન્દ્યા શબ્દજાઽઽકાશસુન્દરી ।
મીનાસ્યા મીનનેત્રા ચ મીનાસ્થા મીનસુન્દરી ॥ ૭૧॥

var મીનપ્રિયા મીનનેત્રા મીનાશા મીનસુન્દરી
કૂર્મપૃષ્ઠગતા કૂર્મી કૂર્મજા કૂર્મસુન્દરી । var કૂર્મરૂપિણી
વારાહી વીરસૂર્વન્દ્યા વરારોહા મૃગેક્ષણા ॥ ૭૨॥

વરાહમૂર્તિર્વાચાલા વશ્યા વારાહસુન્દરી । var દંષ્ટ્રા વારાહસુન્દરી
નરસિંહાકૃતિર્દેવી દુષ્ટદૈત્યનિષૂદિની ॥ ૭૩॥

પ્રદ્યુમ્નવરદા નારી નરસિંહૈકસુન્દરી ।
વામજા વામનાકારા નારાયણપરાયણા ॥ ૭૪॥

બલિદાનવદર્પઘ્ની વામ્યા વામનસુન્દરી ।
રામપ્રિયા રામકલા રક્ષોવંશક્ષયભયઙ્કરી ॥ ૭૫॥ રક્ષોવંશક્ષયઙ્કરી રક્ષોવંશભયઙ્કરી

var રામપ્રિયા રામકીલિઃ ક્ષત્રવંશક્ષયઙ્કરી

ભૃગુપુત્રી રાજકન્યા રામા પરશુધારિણી । var દનુપુત્રી
ભાર્ગવી ભાર્ગવેષ્ટા ચ જામદગ્ન્યવરપ્રદા ॥ ૭૬॥

કુઠારધારિણી રાત્રિર્જામદગ્ન્યૈકસુન્દરી ।
સીતાલક્ષ્મણસેવ્યા ચ રક્ષઃકુલવિનાશિની ॥ ૭૭॥

રામપ્રિયા ચ શત્રુઘ્ની શત્રુઘ્નભરતેષ્ટદા ।
લાવણ્યામૃતધારાઢ્યા લવણાસુરઘાતિની ॥ ૭૮॥

લોહિતાસ્યા પ્રસન્નાસ્યા સ્વાત્મારામૈકસુન્દરી । var સ્વાગમા રામસુન્દરી
કૃષ્ણકેશા કૃષ્ણમુખી યાદવાન્તકરી લયા ॥ ૭૯॥

યાદોગણાર્ચિતા યોજ્યા રાધા શ્રીકૃષ્ણસુન્દરી ।
સિદ્ધપ્રસૂઃ સિદ્ધદેવી જિનમાર્ગપરાયણા ॥ ૮૦॥ var બુદ્ધપ્રસૂર્બુદ્ધદેવી

જિતક્રોધા જિતાલસ્યા જિનસેવ્યા જિતેન્દ્રિયા ।
જિનવંશધરોગ્રા ચ નીલાન્તા બુદ્ધસુન્દરી ॥ ૮૧॥

કાલી કોલાહલપ્રીતા પ્રેતવાહા સુરેશ્વરી ।
કલ્કિપ્રિયા કમ્બુધરા કલિકાલૈકસુન્દરી ॥ ૮૨॥

વિષ્ણુમાયા બ્રહ્મમાયા શામ્ભવી શિવવાહના ।
ઇન્દ્રાવરજવક્ષઃસ્થા સ્થાણુપત્ની પલાલિની ॥ ૮૩॥

જૃમ્ભિણી જમ્ભહર્ત્રી ચ જૃમ્ભમાણાલકાકુલા । var ઋમ્ભમાણકચાલકા
કુલાકુલફલેશાની પદદાનફલપ્રદા ॥ ૮૪॥

કુલવાગીશ્વરી કુલ્યા કુલજા કુલસુન્દરી ।
પુરન્દરેડ્યા તારુણ્યાલયા પુણ્યજનેશ્વરી ॥ ૮૫॥

પુણ્યોત્સાહા પાપહન્ત્રી પાકશાસનસુન્દરી ।
સૂયર્કોટિપ્રતીકાશા સૂર્યતેજોમયી મતિઃ ॥ ૮૬॥

લેખિની ભ્રાજિની રજ્જુરૂપિણી સૂર્યસુન્દરી ।
ચન્દ્રિકા ચ સુધાધારા જ્યોત્સ્ના શીતાંશુસુન્દરી ॥ ૮૭॥

લોલાક્ષી ચ શતાક્ષી ચ સહસ્રાક્ષી સહસ્રપાત્ ।
સહસ્રશીર્ષા ચેન્દ્રાણી સહસ્રભુજવલ્લિકા ॥ ૮૮॥

કોટિરત્નાંશુશોભા ચ શુભ્રવસ્ત્રા શતાનના ।
શતાનન્દા શ્રુતિધરા પિઙ્ગલા ચોગ્રનાદિની ॥ ૮૯॥

સુષુમ્ના હારકેયૂરનૂપુરારાવસઙ્કુલા ।
ઘોરનાદાઽઘોરમુખી ચોન્મુખી ચોલ્મૂકાયુધા ॥ ૯૦॥

ગોપિતા ગૂર્જરી ગોધા ગાયત્રી વેદવલ્લભા ।
વલ્લકીસ્વનનાદા ચ નાદવિદ્યા નદીતટી ॥ ૯૧॥

બિન્દુરૂપા ચક્રયોનિર્બિન્દુનાદસ્વરૂપિણી ।
ચક્રેશ્વરી ભૈરવેશી મહાભૈરવવલ્લભા ॥ ૯૨॥

કાલભૈરવભાર્યા ચ કલ્પાન્તે રઙ્ગનર્તકી ।
પ્રલયાનલધૂમ્રાભા યોનિમધ્યકૃતાલયા ॥ ૯૩॥

ભૂચરી ખેચરી મુદ્રા નવમુદ્રાવિલાસિની ।
વિયોગિની શ્મશાનસ્થા શ્મશાનાર્ચનતોષિતા ॥ ૯૪॥

ભાસ્વરાઙ્ગી ભર્ગશિખા ભર્ગવામાઙ્ગવાસિની ।
ભદ્રકાલી વિશ્વકાલી શ્રીકાલી મેઘકાલિકા ॥ ૯૫॥

નીરકાલી કાલરાત્રિઃ કાલી કામેશકાલિકા ।
ઇન્દ્રકાલી પૂર્વકાલી પશ્ચિમામ્નાયકાલિકા ॥ ૯૬॥

શ્મશાનકાલિકા શુભ્રકાલી શ્રીકૃષ્ણકાલિકા । var ભદ્રકાલી
ક્રીઙ્કારોત્તરકાલી શ્રીં હું હ્રીં દક્ષિણકાલિકા ॥ ૯૭॥

સુન્દરી ત્રિપુરેશાની ત્રિકૂટા ત્રિપુરાર્ચિતા ।
ત્રિનેત્રા ત્રિપુરાધ્યક્ષા ત્રિકૂટા કૂટભૈરવી ॥ ૯૮॥ var ત્રિપુટા પુટભૈરવી

ત્રિલોકજનની નેત્રી મહાત્રિપૂરસુન્દરી ।
કામેશ્વરી કામકલા કાલકામેશસુન્દરી ॥ ૯૯॥

ત્ર્યક્ષર્યેકાક્ષરીદેવી ભાવના ભુવનેશ્વરી ।
એકાક્ષરી ચતુષ્કૂટા ત્રિકૂટેશી લયેશ્વરી ॥ ૧૦૦॥

ચતુર્વર્ણા ચ વર્ણેશી વર્ણાઢ્યા ચતુરક્ષરી ।
પઞ્ચાક્ષરી ચ ષડ્વક્ત્રા ષટ્કૂટા ચ ષડક્ષરી ॥ ૧૦૧॥

સપ્તાક્ષરી નવાર્ણેશી પરમાષ્ટાક્ષરેશ્વરી ।
નવમી પઞ્ચમી ષષ્ટિઃ નાગેશી નવનાયિકા ॥ ૧૦૨॥ var નાગેશી ચ નવાક્ષરી ।

દશાક્ષરી દશાસ્યેશી દેવિકૈકાદશાક્ષરી ।

દ્વાદશાદિત્યસઙ્કાશા (૭૦૦) દ્વાદશી દ્વાદશાક્ષરી ॥ ૧૦૩॥

ત્રયોદશી વેદગર્ભા વાદ્યા (બ્રાહ્મી) ત્રયોદશાક્ષરી ।
ચતુર્દશાક્ષરી વિદ્યા વિદ્યાપઞ્ચદશાક્ષરી ॥ ૧૦૪॥

ષોડશી સર્વવિદ્યેશી મહાશ્રીષોડશાક્ષરી ।
મહાશ્રીષોડશીરૂપા ચિન્તામણિમનુપ્રિયા ॥ ૧૦૫॥

દ્વાવિંશત્યક્ષરી શ્યામા મહાકાલકુટુમ્બિની ।
વજ્રતારા કાલતારા નારી તારોગ્રતારિણી ॥ ૧૦૬॥

કામતારા સ્પર્શતારા શબ્દતારા રસાશ્રયા ।
રૂપતારા ગન્ધતારા મહાનીલસરસ્વતી ॥ ૧૦૭ ॥

કાલજ્વાલા વહ્નિજ્વાલા બ્રહ્મજ્વાલા જટાકુલા ।
વિષ્ણુજ્વાલા જિષ્ણુશિખા ભદ્રજ્વાલા કરાલિની ॥ ૧૦૮॥ વિષ્ણુશિખા

વિકરાલમુખી દેવી કરાલી ભૂતિભૂષણા ।
ચિતાશયાસના ચિન્ત્યા ચિતામણ્ડલમધ્યગા ॥ ૧૦૯॥

ભૂતભૈરવસેવ્યા ચ ભૂતભૈરવપાલિની ।
બન્ધકી બદ્ધસન્મુદ્રા ભવબન્ધવિનાશિની ॥ ૧૧૦॥

ભવાની દેવદેવેશી દીક્ષા દીક્ષિતપૂજિતા ।
સાધકેશી સિદ્ધિદાત્રી સાધકાનન્દવર્ધિની ॥ ૧૧૧॥

સાધકાશ્રયભૂતા ચ સાધકેષ્ટફલપ્રદા ।
રજોવતી રાજસી ચ રજકી ચ રજસ્વલા ॥ ૧૧૨॥

પુષ્પપ્રિયા પુષ્પપૂર્ણા સ્વયમ્ભૂપુષ્પમાલિકા । var પુષ્પપ્રિયા પુષ્પવતી
સ્વયમ્ભૂપુષ્પગન્ધાઢ્યા પુલસ્ત્યસુતનાશિની ॥ ૧૧૩॥ var પુલસ્ત્યસુતઘાતિની

પાત્રહસ્તા પરા પૌત્રી પીતાસ્યા પીતભૂષણા ।
પિઙ્ગાનના પિઙ્ગકેશી પિઙ્ગલા પિઙ્ગલેશ્વરી ॥ ૧૧૪॥

મઙ્ગલા મઙ્ગલેશાની સર્વમઙ્ગલમઙ્ગલા ।
પુરુરવેશ્વરી પાશધરા ચાપધરાઽધુરા ॥ ૧૧૫॥

પુણ્યધાત્રી પુણ્યમયી પુણ્યલોકનિવાસિની ।
હોતૃસેવ્યા હકારસ્થા સકારસ્થા સુખાવતી ॥ ૧૧૬॥

સખી શોભાવતી સત્યા સત્યાચારપરાયણા ।
સાધ્વીશાનકલેશાની વામદેવકલાશ્રિતા ॥ ૧૧૭॥

સદ્યોજાતકલેશાની શિવાઽઘોરકલાકૃતિઃ । var સદ્યોજાતકલા દેવી
શર્વરી વીરસદૃશી ક્ષીરનીરવિવેચિની (૮૦૦) ॥ ૧૧૮॥

વિતર્કનિલયા નિત્યા નિત્યક્લિન્ના પરામ્બિકા ।
પુરારિદયિતા દીર્ઘા દીર્ઘનાસાઽલ્પભાષિણી ॥ ૧૧૯॥

કાશિકા કૌશિકી કોશ્યા કોશદા રૂપવર્ધિની ।
તુષ્ટિઃ પુષ્ટિઃ પ્રજાપ્રીતા પૂજિતા પૂજકપ્રિયા ॥ ૧૨૦॥ var પ્રાજિકા પૂજકપ્રિયા

પ્રજાવતી ગર્ભવતી ગર્ભપોષણકારિણી । var ગર્ભપોષણપોષિતા
શુક્રવાસાઃ શુક્લરૂપા શુચિવાસા જયાવહા ॥ ૧૨૧॥

જાનકી જન્યજનકા જનતોષણતત્પરા ।
વાદપ્રિયા વાદ્યરતા વાદિની વાદસુન્દરી ॥ ૧૨૨॥ var વાદિતા વાદસુન્દરી

વાક્સ્તમ્ભિની કીરપાણિઃ ધીરાધીરા ધુરન્ધરા । var વાક્સ્તમ્ભિની કીરવાણી
સ્તનન્ધયી સામિધેની નિરાનન્દા નિરઞ્જના ॥ ૧૨૩॥ var નિરાનન્દા નિરાલયા

સમસ્તસુખદા સારા વારાન્નિધિવરપ્રદા ।
વાલુકા વીરપાનેષ્ટા વસુધાત્રી વસુપ્રિયા ॥ ૧૨૪ ।
શુકાનાન્દા શુક્રરસા શુક્રપૂજ્યા શુકપ્રિયા ।
શુચિશ્ચ શુકહસ્તા ચ સમસ્તનરકાન્તકા ॥ ૧૨૫॥ var શુકી ચ શુકહસ્તા ચ

સમસ્તતત્ત્વનિલયા ભગરૂપા ભગેશ્વરી ।
ભગબિમ્બા ભગાહ્વદ્યા ભગલિઙ્ગસ્વરૂપિણી ॥ ૧૨૬॥

ભગલિઙ્ગેશ્વરી શ્રીદા ભગલિઙ્ગામૃતસ્રવા ।
ક્ષીરાશના ક્ષીરરુચિઃ આજ્યપાનપરાયણા ॥ ૧૨૭॥

મધુપાનપરા પ્રૌઢા પીવરાંસા પરાવરા ।
પિલમ્પિલા પટોલેશા પાટલારુણલોચના ॥ ૧૨૮॥

ક્ષીરામ્બુધિપ્રિયા ક્ષિપ્રા સરલા સરલાયુધા ।
સઙ્ગ્રામા સુનયા સ્રસ્તા સંસૃતિઃ સનકેશ્વરી ॥ ૧૨૯॥

કન્યા કનકરેખા ચ કાન્યકુબ્જનિવાસિની ।
કાઞ્ચનોભતનુઃ કાષ્ઠા કુષ્ઠરોગનિવારિણી ॥ ૧૩૦॥

કઠોરમૂર્ધજા કુન્તી કુન્તાયુધધરા ધૃતિઃ ।
ચર્મામ્બરા ક્રૂરનખા ચકોરાક્ષી ચતુર્ભુજા ॥ ૧૩૧॥

ચતુર્વેદપ્રિયા ચાદ્યા ચતુર્વર્ગફલપ્રદા ।
બ્રહ્માણ્ડચારિણી સ્ફુર્તિઃ બ્રહ્માણી બ્રહ્મસમ્મતા ॥ ૧૩૨॥

સત્કારકારિણી સૂતિઃ સૂતિકા લતિકાલયા (૯૦૦)
કલ્પવલ્લી કૃશાઙ્ગી ચ કલ્પપાદપવાસિની ॥ ૧૩૩॥

કલ્પપાશા મહાવિદ્યા વિદ્યારાજ્ઞી સુખાશ્રયા ।
ભૂતિરાજ્ઞી વિશ્વરાજ્ઞી લોકરાજ્ઞી શિવાશ્રયા ॥ ૧૩૪॥

બ્રહ્મરાજ્ઞી વિષ્ણુરાજ્ઞી રુદ્રરાજ્ઞી જટાશ્રયા ।
નાગરાજ્ઞી વંશરાજ્ઞી વીરરાજ્ઞી રજઃપ્રિયા ॥ ૧૩૫॥

સત્ત્વરાજ્ઞી તમોરાજ્ઞી ગણરાજ્ઞી ચલાચલા ।
વસુરાજ્ઞી સત્યરાજ્ઞી તપોરાજ્ઞી જપપ્રિયા ॥ ૧૩૬॥

મન્ત્રરાજ્ઞી વેદરાજ્ઞી તન્ત્રરાજ્ઞી શ્રુતિપ્રિયા ।
વેદરાજ્ઞી મન્ત્રિરાજ્ઞી દૈત્યરાજ્ઞી દયાકરા ॥ ૧૩૭॥

કાલરાજ્ઞી પ્રજારાજ્ઞી તેજોરાજ્ઞી હરાશ્રયા ।
પૃથ્વીરાજ્ઞી પયોરાજ્ઞી વાયુરાજ્ઞી મદાલસા ॥ ૧૩૮॥

સુધારાજ્ઞી સુરારાજ્ઞી ભીમરાજ્ઞી ભયોજ્ઝિતા ।
તથ્યરાજ્ઞી જયારાજ્ઞી મહારાજ્ઞી મહામત્તિઃ ॥ ૧૩૯॥ var મહારાજ્ઞી કુલોકૃતિઃ

વામરાજ્ઞી ચીનરાજ્ઞી હરિરાજ્ઞી હરીશ્વરી ।
પરારાજ્ઞી યક્ષરાજ્ઞી ભૂતરાજ્ઞી શિવાશ્રયા ॥ ૧૪૦॥ var ભૂતરાજ્ઞી શિવાસના

વટુરાજ્ઞી પ્રેતરાજ્ઞી શેષરાજ્ઞી શમપ્રદા । var બહુરાજ્ઞી પ્રેતરાજ્ઞી
આકાશરાજ્ઞી રાજેશી રાજરાજ્ઞી રતિપ્રિયા ॥ ૧૪૧॥

પાતાલરાજ્ઞી ભૂરાજ્ઞી પ્રેતરાજ્ઞી વિષાપહા ।
સિદ્ધરાજ્ઞી વિભારાજ્ઞી તેજોરાજ્ઞી વિભામયી ॥ ૧૪૨॥

ભાસ્વદ્રાજ્ઞી ચન્દ્રરાજ્ઞી તારારાજ્ઞી સુવાસિની ।
ગૃહરાજ્ઞી વૃક્ષરાજ્ઞી લતારાજ્ઞી મતિપ્રદા ॥ ૧૪૩॥

વીરરાજ્ઞી મનોરાજ્ઞી મનુરાજ્ઞી ચ કાશ્યપી । var ધીરરાજ્ઞી મનોરાજ્ઞી
મુનિરાજ્ઞી રત્નરાજ્ઞી મૃગરાજ્ઞી મણિપ્રભા ॥ ૧૪૪॥ var યુગરાજ્ઞી મણિપ્રભા

સિન્ધુરાજ્ઞી નદીરાજ્ઞી નદરાજ્ઞી દરીસ્થિતા ।
નાદરાજ્ઞી બિન્દુરાજ્ઞી આત્મરાજ્ઞી ચ સદ્ગતિઃ ॥ ૧૪૫॥

પુત્રરાજ્ઞી ધ્યાનરાજ્ઞી લયરાજ્ઞી સદેશ્વરી ।
ઈશાનરાજ્ઞી રાજેશી સ્વાહારાજ્ઞી મહત્તરા ॥ ૧૪૬॥

વહ્નિરાજ્ઞી યોગિરાજ્ઞી યજ્ઞરાજ્ઞી ચિદાકૃતિઃ ।
જગદ્રાજ્ઞી તત્ત્વરાજ્ઞી વાગ્રાજ્ઞી વિશ્વરૂપિણી ॥ ૧૪૭॥

પઞ્ચદશાક્ષરીરાજ્ઞી ૐ હ્રીં ભૂતેશ્વરેશ્વરી । ( ૧૦૦૦)
ઇતીદં મન્ત્રસર્વસ્વં રાજ્ઞીનામસહસ્રકમ્ ॥ ૧૪૮॥

પઞ્ચદશાક્ષરીતત્ત્વં મન્ત્રસારં મનુપ્રિયમ્ ।
સર્વતત્ત્વમયં પુણ્યં મહાપાતકનાશનમ્ ॥ ૧૪૯॥

સર્વસિદ્ધિપ્રદં લોકે સર્વરોગનિબર્હણમ્ ।
સર્વોત્પાતપ્રશમનં ગ્રહશાન્તિકરં શુભમ્ ॥ ૧૫૦॥

સર્વદેવપ્રિયં પ્રાજ્યં સર્વશત્રુભયાપહમ્ ।
સર્વદુઃખૌઘશમનં સર્વશોકવિનાશનમ્ ॥ ૧૫૧॥

પઠેદ્વા પાઠયેત્ નામ્નાં સહસ્રં શક્તિસન્નિધૌ ।
દૂરાદેવ પલાયન્તે વિપદઃ શત્રુભીતયઃ ॥ ૧૫૨॥

રાક્ષસા ભૂતવેતાલાઃ પન્નગા હરિણદ્વિષઃ ।
પઠનાદ્વિદ્રવન્ત્યાશુ મહાકાલાદિવ પ્રજાઃ ॥ ૧૫૩॥

શ્રવણાત્પાતાકં નશ્યેચ્છ્રાવયેદ્યઃ સ ભાગ્યવાન્ ।
નાનાવિધાનિ ભોગાનિ સમ્ભૂય પૃથિવીતલે ॥ ૧૫૪॥

ગમિષ્યતિ પરાં ભૂમિં ત્વરિતં નાત્ર સંશયઃ ।

NOTE: The following verses (155-175) are not found
in S V Radhakrishna Sastri's Book

અશ્વમેધસહસ્રસ્ય વાજિપેયસ્ય કોટયઃ ।
ગઙ્ગાસ્નાનસહસ્રસ્ય ચાન્દ્રાયણાયુતસ્ય ચ ॥ ૧૫૫॥

તપ્તકૃચ્છ્રૈકલક્ષસ્ય રાજસૂયસ્ય કોટયઃ ।
સહસ્રનામપાઠસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૧૫૬॥

સર્વસિદ્ધીશ્વરં સાધ્યં રાજ્ઞીનામસહસ્રકમ્ ।
મન્ત્રગર્ભં પઠેદ્યસ્તુ રાજ્યકામો મહેશ્વરિ ॥ ૧૫૭॥

વર્ષમેકં શતાવર્તં મહાચીનક્રમાકુલઃ ।
શક્તિપૂજાપરો રાત્રૌ સ લભેદ્રાજ્યમીશ્વરિ ॥ ૧૫૮॥

પુત્રકામી પઠેત્સાયં ચિતાભસ્માનુલેપનઃ ।
દિગમ્બરો મુક્તકેશઃ શતાવર્તં મહેશ્વરિ ॥ ૧૫૯॥

શ્મશાને તુ લભેત્પુત્રં સાક્ષાદ્વૈશ્રવણોપમમ્ ।
પરદારાર્ચનરતો ભગબિમ્બં સ્મરન્ સુધીઃ ॥ ૧૬૦॥

પઠેન્નામસહસ્રં તુ વસુકામી લભેદ્ધનમ્ ।
રવૌ વારત્રયં દેવિ પઠેન્નામસહસ્રકમ્ ॥ ૧૬૧॥

મૃદુવિષ્ટરનિર્વિષ્ટઃ ક્ષીરપાનપરાયણઃ ।
સ્વપ્ને સિંહાસનાં રાજ્ઞીં વરદાં ભુવિ પશ્યતિ ॥ ૧૬૨॥

ક્ષીરચર્વણસન્તૃપ્તો વીરપાનરસાકુલઃ ।
યઃ પઠેત્પરયા ભક્ત્યા રાજ્ઞીનામસહસ્રકમ્ ॥ ૧૬૩॥

સ સદ્યો મુચ્યતે ઘોરાન્મહાપાતકજાદ્ભયાત્ ।
યઃ પઠેત્સાધકો ભક્ત્યા શક્તિવક્ષઃકૃતાસનઃ ॥ ૧૬૪॥

શુક્રોત્તરણકાલે તુ તસ્ય હસ્તેઽષ્ટસિદ્ધયઃ ।
યઃ પઠેન્નિશિ ચક્રાગ્રે પરસ્ત્રીધ્યાનતત્પરઃ ॥ ૧૬૫॥

સુરાસવરસાનન્દી સ લભેત્સંયુગે જયમ્ ।
ઇદં નામસહસ્રં તુ સર્વમન્ત્રમયં શિવે ॥ ૧૬૬॥

ભૂર્જત્વચિ લિખેદ્રાત્રૌ ચક્રાર્ચનસમાગમે ।
અષ્ટગન્ધેન પૂતેન વેષ્ટયેત્ સ્વર્ણપત્રકે ॥ ૧૬૭॥

ધારયેત્ કણ્ઠદેશે તુ સર્વસિદ્ધિઃ પ્રજાયતે ।
યો ધારયેન્મહારક્ષાં સર્વદેવાતિદુર્લભામ્ ॥ ૧૬૮॥

રણે રાજકુલે દ્યૂતે ચૌરરોગાદ્યુપદ્રવે ।
સ પ્રાપ્નોતિ જયં સદ્યઃ સાધકો વીરનાયકઃ ॥ ૧૬૯॥

શ્રીચક્રં પૂજયેદ્યસ્તુ ધારયેદ્વર્મ મસ્તકે ।

પઠેન્નામસહસ્રં તુ સ્તોત્રં મન્ત્રાત્મકં તથા ॥ ૧૭૦॥

કિં કિં ન લભતે કામં દેવાનામપિ દુર્લભમ્ ।
સુરાપાનં તતઃ સંવિચ્ચર્વણં મીનમાંસકમ્ ॥ ૧૭૧॥

નવકન્યાસમાયોગો મુદ્રા વીણારવઃ પ્રિયે ।
સત્સઙ્ગો ગુરુસાન્નિધ્યં રાજ્ઞીશ્રીચક્રમગ્રતઃ ॥ ૧૭૨॥

યસ્ય દેવિ સ એવ સ્યાદ્યોગી બ્રહ્મવિદીશ્વરઃ ।
ઇદં રહસ્યં પરમં ભક્ત્યા તવ મયોદિતમ્ ॥ ૧૭૨॥

અપ્રકાશ્યમદાતવ્યં ન દેયં યસ્ય કસ્યચિત્ ।
અન્યશિષ્યાય દુષ્ટાય દુર્જનાય દુરાત્મને ॥ ૧૭૪॥

ગુરુભક્તિવિહીનાય સુરાસ્ત્રીનિન્દકાય ચ ।
નાસ્તિકાય કુશીલાય ન દેયં તત્ત્વદર્શિભિઃ ॥ ૧૭૫॥

NOTE: S V Radhakrishna Sastri's Book continues with the following:
દેયં શિષ્યાય શાન્તાય ભક્તાયાદ્વૈતવાદિને ।
દીક્ષિતાય કુલીનાય રાજ્ઞીભક્તિરતાય ચ ॥ ૧૭૬॥

દત્ત્વા ભોગાપવર્ગૌ ચ લભેત્સાધકસત્તમઃ ।
ઇતિ નામસહસ્રં તુ રાજ્ઞ્યાઃ શિવમુખોદિતમ્ ।
અત્યન્તદુર્લભં ગોપ્યં ગોપનીયં સ્વયોનિવત્ ॥ ૧૭૭॥

NOTE: the following two extra shlokams are found
in S V Radhakrishna Sastri's Book

અષ્ટાવિંશતિનૈજમાન્યમુનિભિઃ ભાવ્યાં મહાયોગિભિઃ
    શ્રીવાણીકરવીજિતાં સુમકુટાં શ્રીચક્રબિન્દુસ્થિતામ્ ।
પઞ્ચબ્રહ્મસુતત્વમઞ્ચનિલયાં સામ્રાજ્યસિદ્ધિપ્રદાં
    શ્રીસિંહાસનસુન્દરીં ભગવતીં રાજેશ્વરીમાશ્રયે ॥ ૧॥

શ્વેતછત્રસુવાલવીજનનુતા માલાકિરીટોજ્જ્વલા
    સન્મન્દસ્મિતસુન્દરી શશિધરા તામ્બૂલપૂર્ણાનના ।
શ્રીસિંહાસનસંસ્થિતા સુમશરા શ્રીવીરવર્યાસના
    સામ્રાજ્ઞી મનુષોડશી ભગવતી માં પાતુ રાજેશ્વરી ॥ ૨॥

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે દશવિદ્યારહસ્યે

શ્રીમહારાજ્ઞીસહસ્રનામસ્તોત્રં સમાપ્તમ્ ॥

Encoded by DPD, Alex
Proofread by DPD, Pallasena Narayanaswami ppnswami at gmail.com
PSA Easwaran

This work was proof read using the version found in S V Radhakrishna Sastri's Book, shrI bhagavatI stutima njarI (pages 158-173). We find a few extra verses here, that are not found in this book. In Radhakrishna Sastri's book, the verse sequence 1-156 starts from the following shlokam. Also, in verse No. 49, SVR's book uses six padas (3 lines instead of four padas in 2 lines), so the actual count in the book and the encoded version may be slightly different.

The var is used to indicate variation or pAThabheda found in two different prints.

---

*Shri Maharajni Sahasranamastotram*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*